दासचारणमल्लानां हस्त्यश्वायुधजीविनाम्। प्रत्येकैकसमूहानां नायका वर्गिणः स्मृताः। तेषां वादः स्ववर्गेषु वर्गिणस्तेषु साक्षिणः"। अत्र सर्वत्र न्यूनाधिकविशेषणोपादानञ्च दोषाय अन्ततभाषणभीरुत्वसत्यवदनशीलत्वस्य च साक्षित्वप्रयोजकस्योपलक्षणार्थत्वात् तेषाम्। ते च साक्षिणः कियत्सङ्ख्यकाः कुत्र ग्राह्या इत्यपेक्षायामाह बृहस्पतिः "नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव वा। उभौ वा श्रोत्रियौ ख्यातौ नैकं पृच्छेत् कदाचन"। लिखितादिषु स एवाह "लिखितौ द्वौ तथा गूढौ त्रिश्चतुःपञ्च लेखिताः। यदृच्छाः स्मारिताः कार्य्यास्तथा चोत्तरसाक्षिणः। दूतकः खटिकाग्राही कार्य्यमध्यगतस्तथा। एक एव प्रमाणं स्यान्नृपोऽध्यक्षस्तथैव च"। खटिकाग्राही लेखकः एक एवेत्येवकारो वाद्यपेक्षया "नैकं पृच्छेत् कदाचन" इत्युक्तेः अनावश्यकत्वार्थो न नियमार्थोऽदृष्टार्थत्वप्रसङ्गात्। त्र्यवराः साक्षिणो ज्ञेया इति योगीश्वरीयमप्येतदभिप्रायकमेव। लिखितादीनामुभयानुमतत्वे ग्राह्यत्वमेकस्यापीत्याह योगीश्वरः "उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्"। यद्यपि "श्रौतस्मार्त्तक्रियापरा धर्मप्रधाना" इत्यादिविशेषणोपादानात् त्र्यवराणामपि धर्मवित्त्वं समानन्तथापि तेषामुभयाननुमतौ न भवत्येव साक्षित्वं, द्वयोरेकस्य चोभयानुमत्यैवेति भेद इति मिताक्षरा। नारदोऽपि "उभयानुमतो यः स्याद्द्वयोर्विवदमानयोः। स साक्ष्येकोऽपि साक्षित्वे प्रष्टव्यः स्यात् संसदि"। आप्तत्वेन राजादिभिरवधारितोऽप्येकः साक्षीत्याह व्यासः "शुचिक्रियश्च धर्मज्ञः साक्षी यत्रानुभूतवाक्। प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः" इति। अनुभूता यथार्थत्वेन प्रमितचरा वाग्यस्येत्यनुभूतवाक्। कात्यायनः "अभ्यन्तरस्तु निःक्षेपे साक्ष्यमेकोऽपि वाच्यते। अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते"। याचित इति निःक्षेपविशेषणम्। न्यायतौल्यादन्यत्रापीति वाचस्पतिः। मदनरत्नकारस्तु याचितं विवाहाद्यर्थं याचितं गृहीतमाभरणादिकं याचितकमिति यावदित्याह। निःक्षेपविशेषणत्वे याचिते तस्मिन्नभ्यन्तरस्यैकस्य साक्षित्वप्रसङ्गाद्व्यवहितान्वयप्रसक्तेश्चोत्तरैव व्याख्या प्रशस्ता। कुण्डलादिपण्यविवादे तद्विक्रेतैकोऽपि साक्षीत्याह स एव "संस्कृतं येन यत्पण्यं तत्तेनैव विभावयेत्। एक एव प्रमाणं स विवादे तत्र कीर्त्तितः"। इदञ्च अनुनाससम्भवे स्वल्पवादिनोर्द्वयोरेकस्य वानुमतिप्रदर्शनार्थं न नियमार्थम् अदृष्टार्थत्वप्रसङ्गादिति ध्येयम्। उक्तलक्षणसाक्ष्यसम्भवे प्रतिषेधरहितानां साक्ष्यनुकल्पानां सूचनार्थमसाक्षिणोऽपि स्मृतिषूक्ताः"।

ते च असाक्षिन्शब्दे ५४९ पृ०। दर्शिताः।

साक्षिणो मिथ्याकथने अकथने च दोषो यथा "पृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा वदेत्। स पूर्वानात्मनः सप्त कुले हन्यात्तथा परान्। यश्च कार्य्यार्थतत्त्वज्ञो जानन्नपि न भाषते। सोऽपि तेनैव पापेन लिप्यते नात्र संशयः" मा०स्मा० "ब्रह्मस्वस्याप्यहारी च मिथ्यासाक्ष्यप्रदायकः। मित्रद्रोही कृतघ्नश्च वृषवाहकशूद्रकृत्। एते महापातकिनस्त्रिषु लोकेषु निन्दिताः। कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम्" ब्रह्म०वै०गण०ख०४४अ०। "मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा भयात्। सभायां पाक्षिकं वक्ति स कृतघ्न इति स्मृतः। मिथ्यासाक्ष्यं पाक्षिकं वा भारते वक्ति यो नृप!। यावदिन्द्रसहस्रञ्च सर्पकुण्डे वसेद्ध्रुवम्। सन्ततं वेष्टितैः सर्पैर्भीतश्च भक्षितस्तथा। भुङ्क्ते च सर्पविण्मूत्रं यमदूतेन ताडितः। ककलासो भवेत्तत्र भारते सप्तजन्मसु। सप्तजन्मसु मण्डूकः पितृभिः सप्तभिः सह। ततो भवेच्च वृक्षश्च महारण्ये च शाल्मलिः। ततो भवेन्नरो मूकस्ततः शूद्रस्ततः शुचिः" ब्रह्मवै०प्र०४९अ०।

साक्षिणो यथा विवादे कर्तृत्वाद्यभाव एवं जीवसाक्षिणो कर्तृत्वाभावः ईश्वरसाक्षिन्शब्दे १०४८पृ० दृश्यम् तयोर्वृत्त्यादिप्रकाशकत्वात् तथात्वम् अन्तःकरणमाययोर्जडत्वेन विषयावभासकत्वाभावेन चैतन्योपाधित्वमेव न तु विशेषणत्वं विषयावभासकत्वे तदन्वयायोगात्। अत एव स्वस्योपाधिवृत्तिचित्तवृत्तिसुखादेरेवावभासकत्वान्नातिप्रसङ्गः इति वेदान्तपरिभाषाप्रत्यक्षपरि० दृश्यम्।

सांख्यसू० भाष्ययोश्चेतनस्य साक्षित्व समर्थितं यथा "ननु साक्षित्वस्यानित्यत्वात् पुरुषाणां कथं सदैकरूपत्वं तत्राह "साक्षात्सम्बन्धात् साक्षित्वम्" सू० पुरुषस्य यत् साक्षित्वमुक्तं तत् साक्षात्सम्बन्धमात्रात् न तु परिणामत इत्यर्थः। साक्षात्सम्बन्धेन बुद्धिमात्रसाक्षितावगम्यते "साक्षाद्द्रष्टरि संज्ञायामिति" पा०साक्षिशब्दव्युत्पादनात्। साक्षाद्द्रष्टृत्वं चाव्यवधानेन द्रष्टृत्वम्। पुरुषे च साक्षात्सम्बन्धः स्वबुद्धिवृत्तेरेव भवति। अतो बुद्धेरेव साक्षी पुरुषोऽन्येषां तु द्रष्टृमात्रमिति शास्त्रीयो